# केरलपाठावलिः

# संस्कृतम्

## षष्ठी कक्ष्या

संस्कृतविद्यालयानां कृते

# KERALA READER SANSKRIT

## STANDARD VI

For Sanskrit Schools only

Government of Kerala

Department of Education

KT 311-1/Sanskrit-6

## राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारत भाग्यविधाता।
पंजाब सिंध गुजरात मराठा,
द्राविड उत्कल बंगा,
विंध्य हिमाचल यमुना गंगा,
उच्छलजलधि तरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव- जय गाथा।
जनगण मंगलदायक जय हे,
भारत भाग्यविधाता।
जय हे जय हे जय हे
जय जय जय जय हे

## प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram 695012, Kerala
Website: www.scertkerala.gov.in
email: scertkerala@gmail.com
Phone:0471-2341883, fax;0471-231869
Typesetting and Layout: SCERT
First Edition: 2015, Reprint: 2016
Printed at : KBPS, kakkanad, Kochi
Department of Education, Government of Kerala

# भूमिका

प्रियच्छात्र!

प्रवर्तनाधिष्ठिता छात्रकेन्द्रीकृता च भवति अस्माकं पाठ्यपद्धतिः। तदनुसृत्य छात्राणां सर्वतोमुखविकासं लक्ष्यीकृत्य पाठ्यक्रमः स्वीकृतः अस्ति। पाठ्यक्रमे अद्वितीयं भवति पाठपुस्तकम्। भाषापराणां नैपुणीनां विकासाय स्वयं पठनाय च पाठपुस्तकम् उपकरोति।

विविधव्यवहाररूपाणां परिचायनाय पुस्तकेऽस्मिन् पठनसन्दर्भाः आयोजिताः वर्तन्ते। पठितानाम् आशयानां प्रबलीकरणाय नूतनसन्दर्भेषु प्रयोगाय स्वयंमूल्यनिर्णयाय च अवसराः यथायोग्यं दत्ताः।

भाषापठनम् अनायासं सुखप्रदं च कर्तुं पाठपुस्तकमिदं प्रयोजकमिति चिन्तयामि। वर्णमनोहराणि चित्राणि छात्रमनांसि आकर्षन्ति नूनम्। संस्कृतपठनं सर्वथा मधुरं सफलं च भवतु इति आशासे।

डा॰ पि ए फात्तिमा
निदेशकः
राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्,
केरलाः

## TEXT BOOK DEVELOPMENT COMMITTEE

**SANSKRIT STANDARD VI - ORIENTAL**

### PARTICIPANTS

1. **K. Ramani,** H.S.A, K.V.S.H.S.S,Muthukulam,Alappuzha
2. **R. Muraleedharan**, (Rtd.) H.S.A, Thiruvananthapuram
3. **N.Aravindakshan**, G.U.P.S Mangaram, Pandalam, Pathanamthitta
4. **Unnikrishnan.K.C**, G.H.S.S Edappalli, Ernakulam
5. **Sunilkumar Nair.K**, G.H.S.S Paivalike,Kasaragod
6. **Deepakumari D.S,** H.S.A, Amrutha Vidyalayam, Paripally, Kollam

### EXPERTS

1. **Dr. Sahadevan.G ,** Prof. (Rtd.) University College, Thiruvananathapuram
2. **Madhavan Pillai. V**, Associate Professor in Sanskrit (Rtd.) Govt. College for Women.
3. **Dr.T.D Suneethi Devi**, Special Officer (Sanskrit) DPI, Thiruvananthapuram

### ADVISOR

**Dr. R. Vasudevan Potti,** Professor (Rtd), Govt. Sanskrit College, Thiruvananthapuram

### ARTISTS

1. **Rajeevan Parayil**, Azhikkode H.S , Kannur
2. **Varghese Kalathil**, G.H.S.S Pallikkunu, Kannur
3. **Balakrishnan Achary.P.G**, Lecturer (Rtd.) D.I.E.T

### LAYOUT & GRAPHICS

1. **Rajeevan Parayil**, Azhikkode H.S , Kannur
2. **Varghese Kalathil**, G.H.S.S Pallikkunu, Kannur

### ACADEMIC CO ORDINATOR

**Dr.Shameeja.P**

Research Officer (Sanskrit), SCERT


राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषद्, केरलाः

STATE COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING , KERALA

| क्रमसंख्या | विषयानुक्रमणिका | पुटसंख्या |
|---|---|---|
| | **एककम्-१- आरोग्यम्** | |
| १. | मालिन्यमुक्तं करिष्यामः (उपन्यासः) | ८ |
| | **एककम्-२-संस्कृतिः** | |
| २. | मातृस्नेहः (कथा) | १७ |
| ३. | केरलपाणिनिः (जीवनचरित्रम्) | २४ |
| ४. | श्रीरामोदन्तम् (काव्यम्) | ३२ |
| | **एककम्-३-अमरकोशः** | |
| ५. | अमरकोशः (पर्यायपदानि) | ५२ |
| | पर्वतः, मनुष्यः नगरम्, गृहम्, शब्दः, वृक्षः, चित्तम्। | |


KT 311-2/Sanskrit-6


# पाठपुस्तकेऽस्मिन् उपयुक्ताः सूचनाः



भाषणम्



आलपनम्



रङ्गे अवतारणम्



वर्णलेपनम्



लेखनम्



वर्गीकरणम्

एककम्-१

# आरोग्यम्

मानवजीवने शुचित्वस्य स्थानं अतिप्रधानं भवति। मानसिकं शारीरिकं च शुचित्वम् आरोग्यं परिपोषयति। तथा परिस्थितिशुचित्वस्य अपि प्राधान्यमवगन्तव्यमेव। मालिन्यनाशः मानवस्वभाव इव जीविते पालनीयः । अत एव पाठभागोऽयम् अस्मिन् एकके संयोजिता।

**पठनाधिगमाः**

*१. उपन्यासं पठति।*

*२. टिप्पणीं लिखति।*

*३. उपन्यासं लिखति।*

प्रथमः पाठः

# मालिन्यमुक्तं करिष्यामः



पुराणेषु वसुधायाः प्राधान्यमधिकतया सूचितमस्ति। भूमिः देवता भवति। न केवलमस्माकं किन्तु सर्वेषां चराचराणाम् आवासयोग्या भवति भूमिः। भूमिरिव प्राधान्यमर्हन्ति जलं तेजः प्राणवायुश्च। वसुधायाः जलस्य तेजसः वायोः च स्थितौ आकाशमेव अधिष्ठानम्। अतः अस्माभिः भूमिं जलं आकाशं वायुः च संरक्षणीयानि। वसुधा मलिना भवति चेत्

तस्यां जायमानानि सस्यजालानि धान्यानि च मलिनानि भवेयुः। मालिन्ययुक्तानां सस्यानां धान्यानां जलस्य वायोः च उपयोगेन जनाः रुग्णाः भविष्यन्ति। अतः एतेषां संरक्षणम् अस्माभिः कार्यम्।

पलास्तिकवस्तूनाम् अमितोपयोगः न कार्यः। रासोर्वरकाणां स्थाने जैवकृषिः उचिता। जैवकृषिणा वसुधायाः पुष्टिः जायते। रोगरहित सस्यसम्पत् जायते। मांसावशिष्टानाम् उचितं संस्करणं कार्यम्। तत्तद्गृहे जायमानानां मालिन्यानां तत्तद्भूमौ एव उचितया रीत्या निक्षेपः कार्यः। पलास्तिकवस्तूनां संस्करणं अवश्यमेव। साध्यं चेत् तानि नोपयोक्तव्यानि। कदापि तेषां दाहः न कार्यः। दाहेन अन्तरीक्षमलिनीकरणं जायते। प्राणवायोः स्थाने मलिनधूमेन अन्तरीक्षं मलिनं भवेत्। पर्याप्तस्य प्राणवायोरभावे श्वाससम्बन्धिनः रोगाः जायन्ते।

वृक्षरोपणेन वायुमण्डलं शुद्धं भवेत्। अमितरीत्या शब्दोत्पादनेन आकाशं मलिनं भवेत्। अतः अमितः शब्दः यथाशक्ति निवारणीयः। एवम् अस्मान् परितः वर्तमाना स्थितिः यथावत् संरक्ष्यते ।तदेव परिस्थितिसंरक्षणम्। अतः अस्माकं जीवितं शुद्धं सुसम्पन्नं च भवेत्। तदर्थं मालिन्यमुक्तं भारतं करिष्यामः इति प्रतिज्ञां कुर्वन्तु।।

**सर्वे भवन्तु सुखिनः।**

**सर्वे सन्तु निरामयाः।**

**पदच्छेदः**

सूचितमस्ति - सूचितम् +अस्ति

भूमिरिव - भूमिः+ इव।

प्राणवायुश्च - प्राणवायुः + च

प्राधान्यमर्हतः - प्राधान्यम् + अर्हतः।

अवश्यमेव - अवश्यम् + एव।

प्राणवायोरभावेन - प्राणवायोः + अभावेन।

**विग्रहः**

मालिन्यमुक्तम् - मालिन्यात् मुक्तम्।

तत्तद्भूमौ - तस्यां तस्यां भूमौ।

तत्तद्गृहे - तस्मिन् तस्मिन् गृहे।

निवारणीयम् - निवारयितुम् योग्यम्।

## पठनप्रवर्तनानि



**नामपदानि क्रियापदानि अव्ययानि च उपयुज्य वाक्यानि लिखतु।**

वसुधा। अस्ति। परितः। भवेयुः। धूमः।

जायते। रुग्णः। करिष्यामः। भवेत्।


न केवलं। कुर्वन्तु। रासोर्वरकम्। पलास्तिकवस्तु।

| नामपदानि | क्रियापदानि | अव्ययपदानि। |
|---|---|---|
| | | |

*श्रद्धेयाः अंशाः-* पदबोधः।

पदविवेचनम्।

वाक्यरचना।



**पाठभागं पठित्वा प्रश्नोत्तरकेलीं प्रचालयतु**

श्रद्धेयौ अंशौ- व्यक्तता कृत्यता।

आशयग्रहणम्।



**उपन्यासं पठित्वा चर्चां कृत्वा परिस्थितिं रोगनिवारणं च अधिकृत्य टिप्पणीं लिखतु।**

*श्रद्धेयाः अंशाः-* आशयावगमनम्।

विविच्य ज्ञानम्।

लेखनसामर्थ्यम्।



**पदानि चित्वा अधोलिखितानां पदानां पर्यायपदानि लिखतु।**

शाखी। धरा। भूमिः। वारि।

तरुः। विटपी। धरित्री। पयः।

पादपः। आपः। सलिलं। धरणी।

| वृक्षः | वसुधा | जलम् |
|---|---|---|
| | | |

*श्रद्धेयौ अंशौ-* पदपरिचयः

उचितानां पदानां चयनम्।



**गृहे विद्यालये परिसरेषु च उत्पाद्यमानानि जैवानि अजैवानि च मालिन्यानि कथं अपाकर्तुं शक्ये इति चर्चां कृत्वा टिप्पणीं लिखत।**

## अनुबन्धः

वाक्यप्रयोगः-

परितः - गृहं परितः वृक्षाः सन्ति।

न केवलं- किन्तु - न केवलं मलयालभाषायां किन्तु सर्वासु भारतीयभाषासु संस्कृतस्य स्वाधीनता अस्ति।

## अधिकविस्तरः

सर्वचराचराणि पञ्चभूतात्मकानि भवन्ति। आकाशं इत्यस्य शून्यता इत्यर्थः चतुर्णां भूतानां (पृथ्वी, अप्, तेजः, वायु) अधिष्ठानाय शून्यता आवश्यकी, अतः (पञ्चमभूते आकाशे आद्याः चत्वारः तिष्ठन्ति इति तात्पर्यम्)।

## व्याकरणविशेषः-

अस्मान् परितः- अभितः परितः समया निकषा हा प्रतियोगेऽपि इति वार्तिकेन द्वितीया विभक्तिः।

## अमरकोशः-

| | | |
|---|---|---|
| **भूमिः** | - | धरा धरित्रीधरणिः क्षोणिः काश्यपीक्षितिः। |
| **जलम्** | - | आपः स्त्री भूम्नि वार्वारि सलिलं जलम्। |
| **आकाशम्** | - | द्यौदिवौ द्वे रित्रयामभ्रं व्योमपुष्करमम्बरम्। |
| **वायुः** | - | समीरमारुतमरुणजगत्त्राणसमीरणाः। |

## धातुपरिचयः

अस् भुवि प.प लट्

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु | अस्ति | स्तः | सन्ति। |
| म.पु | असि | स्थः | स्थ। |
| उ.पु | अस्मि | स्वः | स्मः। |

## भू धातु प.प विधिलिङ्।

| | | | |
|---|---|---|---|
| प्र.पु | भवेत् | भवेताम् | भवेयुः। |
| म.पु | भवेः | भवेतम् | भवेत। |
| उ.पु | भवेयं | भवेव | भवेम। |

## डुकृञ् करणे प.प लृट् (उभयपदी धातुः)

| | | | |
|---|---|---|---|
| प्र.पु | करिष्यति | करिष्यतः | करिष्यन्ति। |
| म.पु | करिष्यसि | करिष्यथः | करिष्यथ। |
| उ.पु | करिष्यामि | करिष्यावः | करिष्यामः। |

### डुकृञ् करणे प.प लोट्

| | | | |
|---|---|---|---|
| प्र.पु | करोतु/कुरुतात् | कुरुताम् | कुर्वन्तु। |
| म.पु | कुरु/ कुरुतात् | कुरुतम् | कुरुत। |
| उ.पु | करवाणि | करवाव | करवाम। |

### जनी प्रादुर्भावे आत्मनेपदी लट्

| | | | |
|---|---|---|---|
| प्र.पु | जायते | जायेते | जायन्ते। |
| म.पु | जायसे | जायेथे | जायध्वे। |
| उ.पु | जाये | जायावहे | जायामहे। |

## किमधिगतम्

निर्देशः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√)क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेश निर्देशः | परिहारबोधनम् * (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १. | नामपदानि, क्रियापदानि, अव्ययपदानि च लिखतानि । | | | | |
| २. | प्रश्नोत्तरकेली प्रचालिता । | | | | |
| ३. | टिप्पणीं लिखिता । | | | | |
| ४. | पर्यायपदानि लिखतानि। | | | | |

*
१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।

## शब्दकोशः

| पदं | संस्कृतम् | कैरली | आङ्गलम्। |
|---|---|---|---|
| धूमः | अग्निवाहः | പുക | a smoke |
| निवारणीयम् | दूरीकर्तव्यम् | തടയപ്പെടണം | to be abstracted |
| निरामयः | रोगरहितः | രോഗമില്ലാത്തവൻ | healthy |
| परितः | अभितः | ചുറ്റിലും | around |
| परिस्थितिः | पर्यावरणम् | ചുറ്റുപാട് | surrounding |
| रासोर्वरकः | कृत्रिमोर्वरकः | രാസവളം | fertilizers |
| रुग्णः | रोगबाधितः | രോഗി | illed one |
| वसुधा | भूमिः | ഭൂമി | Earth |
| वृक्षरोपणम् | वृक्षसंवर्धनम् | വൃക്ഷം വളർത്തൽ | bringing up of trees |

# एककम्-२

## संस्कृतिः

**उत्तमव्यक्तित्वाय सांस्कृतिकबोधः आवश्यकम् एव। स्नेहः, करुणा, धर्मबोधः, इत्यादयो गुणाः आर्जनीयाश्च। तदर्थं काव्यादयः साहित्यरचनाः सर्वथा सहायिकाः भवन्ति। एकके अस्मिन् मातृस्नेहः सत्यसन्धता इत्यादिमूल्यबोधिकां कांचन कथां तथा वाचनपालनं, भ्रातृस्नेहमाहात्म्यं इत्यादीन् गुणान् लब्धुं सहायकं श्रीरामोदन्तकाव्यं च अस्ति। महात्मनां चरितानि मूल्यप्रदायकानि इत्यतः ए. आर्. राजराजवर्मा महाशयस्य जीवनचरितप्रतिपादकम् एकं जीवनचरितं च अप्युपगतं भवति।**

**पठनाधिगमाः**

१. नामपदानि क्रियापदानि च लिखति।

२. कथायाः आशयान् संक्षिप्य लिखति।


३. सम्बोधनारूपाणि प्रश्नवाचकपदानि उपयुज्य वाक्यानि लिखति।

४. महात्मनां चरितं लिखति।

५. कविताम् आलपति। अन्वयं लिखति। आशयं लिखति च।

## द्वितीयः पाठः

# मातृस्नेहः



(संस्कृतसाहित्यं कथाभिः सम्पन्नं भवति। मानवानां स्वभावरूपवत्करणे कथानां मुख्यं स्थानमस्ति। पञ्चतन्त्रकथाः, हितोपदेशकथाः, जातककथाः, जानपदकथाः, ईसोप्कथाः इत्येवमादयः. कथाः बालकथासाहित्ये प्रसिद्धाः भवन्ति।

कर्णाकर्णिकया प्रचलितायाः कस्याश्चन जानपदकथायाः भागोऽत्र दीयते। छात्राणां मनसि स्नेहस्य महत्वं द्योतयितुमेव पाठभागोऽयं योजितः।)

एकदा प्रच्छन्नवेषधारी राजा सोमदत्तः केनचित् मार्गेण गच्छति स्म। तदानीं सः दूरतः कञ्चन कोलाहलम् अश्रृणोत्। यदा सः कोलाहलकारणम् अपृच्छत् तदा एकः अवदत्- "महात्मन्! अत्र द्वयोः महिलयोर्मध्ये कलहः प्रवर्तते , कारणं तु एकः शिशुरेव"।

सोमदत्तः तत्र गत्वा सर्वमवालोकयत्, तूष्णीमतिष्ठत् च। तदानीम् उभयोर्मध्ये एका महिला अवदत्- "धन्यात्मन्! शिशुरयं मदीयः, एषा तु तमचोरयत्" इति। अपरा तु- "महाशय! इयमसत्यवादिनी, शिशुरयं मदीयः, इयमेव चौर्यमकरोत्"।

सर्वं श्रुत्वा सोमदत्तः किमपि मनसि निधाय एवमवदत्-"अस्तु,तं शिशुं दद्यात्, भवत्योः समस्यायाः परिहारमहं करोमि"। छुरिकामेकाम् आनयेदिति निकटस्थं भटमादिशत्। ततः एवमुक्तवान्- "समस्यापरिहाराय एक एवोपायः मम मनसि आयाति। शिशुम् अनया छुरिकया द्विधा कृत्वा एकभागम् एकस्यै, अपरभागम् अपरास्यै च ददामि"।

एतच्छ्रुत्वा सर्वे परस्परं पश्यन्तः आकांक्षाभरिताः अतिष्ठन् । अनन्तरक्षणे किं वा भवेदिति निश्शब्दमतिष्ठन् । तदा तयोरेका वनिता अवदत्- "भवतः व्यवस्थामहम् अङ्गीकरोमि।" झटिति द्वितीया सोमदत्तस्य पादयोः पतित्वा- "धीमन्! मैवं कुरु, शिशुं तस्यै एव ददातु" इत्युक्त्वा अश्रूणि मुञ्चन्ती अतिष्ठत्। सोमदत्तः शिशुं द्वितीयायै अयच्छत्। पुनस्सर्वान् अवदत्- " इयमेवास्य माता। स्नेहमयी माता, कदापि वेदनां नेच्छति"इति।

अनन्तरं असत्यवादिनीं महिलां कारागृहं नेतुं स नीतिमान् राजा आदिशत्। यथार्थमाता तु स्वशिशुं वात्सल्येन समालिङ्ग्य गृहमगच्छत् च।

**पदच्छेदः-**

| | | | | |
|---|---|---|---|---|
| कोलाहलमश्रृणोत् | - | कोलाहलम् | + | अश्रृणोत्। |
| व्यवस्थामहम् | - | व्यवस्थाम् | + | अहम्। |
| आनयेति | - | आनय | + | इति। |
| तयोर्मध्ये | - | तयोः | + | मध्ये । |
| शिशुरयम् | - | शिशुः | + | अयम्। |
| इत्युक्त्वा | - | इति | + | उक्त्वा। |
| पुनस्सर्वान् | - | पुनः | + | सर्वान्। |

**विग्रहः**

| | | |
|---|---|---|
| मदीयः | - | मम अयम्। |
| असत्यवादिनी | - | न सत्यम् असत्यं या असत्यं वदितुं शीलमस्या अस्तीति सा (स्त्री)। |
| समस्यापरिहाराय | - | समस्यायाः परिहारः तस्मै। |
| स्वशिशुम् | - | स्वस्य (स्वस्याः वा) शिशुः, तम्। |

**व्याकरणविशेषः**

गच्छति स्म - वर्तमानकालक्रियया सह स्म योजयति चेत् भूतकालार्थः । (अगच्छत् इति)

अपरास्यै ददामि - दानार्थे चतुर्थी।

शिशुना सह - सह योगे तृतीया विभक्तिः।

## धातुपरिचयः

गच्छति - गम्लृ गतौ परस्मैपदी लट् , प्र.पु.ए.व

अश्रृणोत् - श्रु श्रवणे परस्मैपदी लङ् प्र. पु.ए.व

अपृच्छत् - पृच्छ ज्ञीप्सायां परस्मैपदी लङ् प्र. पु.ए.व

अवदत् - वद् व्यक्तायां वाचि लङ् प्र. पु.ए.व

अतिष्ठत् - स्था धातु (ष्ठा गतिनिवृत्तौ)लङ् प्र.पु.ए.व

अचोरयत् - चुर् स्तेये लङ् प्र. पु. ए.व

अकरोत् - डु कृञ् करणे लङ् प्र.पु.ए.व

करोमि - डु कृञ् करणे लट् उ. पु. ए.व

ददातु - दाञ् दाने लोट् प्र.पु.ए.व

इच्छति - इष् इच्छायाम् लट् प्र.पु.ए.व

आयाति - आ+ या प्रापणे लट् प्र.पु. ए.व

आनय - नीञ् नयने लोट् म. पु.ए.व

## पठनप्रवर्तनानि



**कथाम् उच्चैः पठित्वा भावनानुस्सारं संक्षिप्य लिखतु।**

*श्रद्धेयाः अंशाः-* आशयावगतिः ।

नूतनपदप्रयोगज्ञानम् ।

वाक्यघटना।

उदाहरणवत् पदच्छेदं लिखतु ।

**तमचोरयत् - तम् + अचोरयत्।**

तूष्णीमतिष्ठत् ....................

किमपि ....................

**अनयोर्मध्ये - अनयोः + मध्ये**

उभयोर्मध्ये ..................

महिलयोर्मध्ये ..................

शिशोर्मध्ये ..................

**पाठभागं पठित्वा क्रियापदानि चित्वा लिखतु।**

**कथां पठित्वा समानार्थकपदानि चित्वा लिखतु।**

उदा- वनिता - महिला।

**पाठभागस्थानि अव्ययपदानि चित्वा पट्टिकारूपेण लिखतु।**

| क्त्वान्तम् | ल्यबन्तम् | तुमुन्नन्तम् |
|---|---|---|
| गत्वा | निधाय | नेतुम् |
| . . . . . . . . | . . . . . . . . . . . . | . . . . . . . . . . . |
| . . . . . . . . | . . . . . . . . . . . . | . . . . . . . . . . . |

*श्रद्धेयौ अंशौ-* अव्ययबोधः।

पदविवेचनम्।



### कथास्तम्भं क्रमीकरोतु।

१. असत्यवादिनीम् अपरां महिलां कारागृहं नेतुं भटानादिशत्।

२. धीमन् मैवं कुरु शिशुः तस्यै एव दीयताम्।

३. द्वयोर्महिलयोर्मध्ये शिशुविषये कलहः।

४. सोमदत्तः केनचित् मार्गेण गच्छति स्म।

५. कलहस्य कारणम् अपृच्छत्।

६. समस्यायाः परिहारमहं करोमि सोमदत्तः अवदत्।

७. सः एकं कलहमश्रृणोत्।

८. शिशुं द्विधा कृत्वा भवतीभ्यां ददामि।

*श्रद्धेयौ अंशौ-* आशयावगमः

उचितयारीत्या क्रमीकरणम्



### पाठभागं सम्यक् पठित्वा संबोधनान्तरूपाणि चित्वा लिखतु-

*श्रद्धेयौ अंशौ-* अर्थावगमः

संबोधनास्वरूपज्ञानम्।



**कथायां का वनिता भवताम् इष्टतरा ? कुतः ? कक्ष्यायां चर्चां कृत्वा लिखतु।**

*श्रद्धेयाः अंशाः-* अर्थावगमः।

आशयग्रहणम्।

युक्तिपूर्वं समर्थनम्।

उकारान्तः पुल्लिङ्गः शिशु शब्दः

| | | | |
|---|---|---|---|
| प्र.वि | शिशुः | शिशू | शिशवः। |
| सं.प्र | हे शिशो! | हे शिशू | हे शिशवः। |
| द्वि.वि | शिशुं | शिशू | शिशून्। |
| तृ.वि | शिशुना | शिशुभ्यां | शिशुभिः। |
| च.वि | शिशवे | शिशुभ्यां | शिशुभ्यः। |
| प.वि | शिशोः | शिशुभ्यां | शिशुभ्यः। |
| ष.वि | शिशोः | शिश्वोः | शिशूनां। |
| स.वि | शिशौ | शिश्वोः | शिशुषु। |

दकारान्तः स्त्रीलिङ्गः तद् शब्दः

| | | | |
|---|---|---|---|
| प्र.वि | सा | ते | ताः। |
| द्वि. वि | तां | ते | ताः। |
| तृ.वि | तया | ताभ्यां | ताभिः। |
| च.वि | तस्यै | ताभ्यां | ताभ्यः। |
| प.वि | तस्याः | ताभ्यां | ताभ्यः। |
| ष. वि | तस्याः | तयोः | तासाम्। |
| स.वि | तस्यां | तयोः | तासु। |

**अमरकोशः**

शिशुः - पोतः पाकोऽर्भको डिंभः।
पृथकश्शाबकशिशुः।।

वनिता - स्त्री योषिदबला योषा नारी सीमन्तिनी।
प्रदीपदर्शिनी वामा वनिता महिला तथा।।

# किमधिगतम्

निर्देशः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√)क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेश निर्देशः | परिहारबोधनम्* (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १. | पदच्छेदः कृतः । | | | | |
| २. | क्रियापदानि चितानि । | | | | |
| ३. | समानपदचयनं कृतम्। | | | | |
| ४. | पट्टिकाकरणं कृतम्। | | | | |
| ५. | क्रमीकरणं कृतम्। | | | | |
| ६. | संबोधनान्तरूपाणि चितानि । | | | | |
| ७. | कथा स्ववाक्यैः संक्षिप्य लिखिता । | | | | |

*
१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।

## तृतीयः पाठः

# केरलपाणिनिः



संस्कृतवैयाकरणेषु प्रथमगणनीयः भवति पाणिनिः। तस्य प्रशस्ता रचना भवति अष्टाध्यायी अथवा पाणिनीयम्। केरलीयानां सुपरिचितः वैयाकरणः भवति श्री ए. आर्. राजराजवर्मा महाशयः। केरलपाणिनीयम् इति भाषाव्याकरणग्रन्थस्य रचनया असौ केरलपाणिनिः इति

विख्यातः। सः चङ्ङनाशेरिस्थे लक्ष्मीपुरे प्रासादे लब्धजन्माऽभूत्। तस्य माता कुञ्ञिक्काव् तम्पुराट्टि पिता वासुदेवन् नम्पूतिरिः च।

बाल्ये पितरौ तं वात्सल्येन कोच्चप्पन् इति नाम्ना आह्वयताम्। सः प्राथमिकविद्याभ्यासानन्तरं केरलकालिदासः इति अपरनाम्ना प्रसिद्धात् प्रियमातुलात् केरलवर्मवलियकोयित्तम्पुरान् महाशयात् संस्कृतपाण्डित्यमवाप।

सर्वकलाशालातः बिरुदान् सम्पाद्य संस्कृतपाठशालायाः परिशोधकः, संस्कृतमहाविद्यालयस्य प्रथमाध्यापकः, अनन्तपुर्यां महाराजस्य नाम्ना प्रसिद्धे महाविद्यालये नाट्टुभाषापर्यवेक्षकः, कैरल्याः पाठपुस्तकसमित्यङ्गम् इत्यादिषु स्थानेषु सविशेषश्रद्धया कर्म चकार। बहुभाषापण्डितः सः सप्तत्यधिकान् ग्रन्थान् व्यरचयत्। व्याकरणशास्त्रमधिकृत्य लघुपाणिनीयम्, केरलपाणिनीयम् , शब्दशोधिनी इत्यादयो ग्रन्थाः महात्मनेन रचिताः।

संस्कृतभाषायाः कैरल्याश्च बहुविधैः ग्रन्थैः कृतयोगदानस्य विख्यातस्य तस्य जीवनकालः कोलम्बाब्दे १०३८- १०९३ आसीत्। महाशयस्य अस्य प्रतिमा अनन्तपुरस्थ-राजकीयकलाशालायाः अङ्कणचत्वरे उपस्थापिता वर्तते।

# पठनप्रवर्तनानि



**पाठभागस्थानि लङ् रूपाणि चित्वा लिखतु।**

श्रद्धेयौ अंशौ-

१. लकारावबोधः

२. पदविवेचनम्।



**मञ्जूषातः पदानि स्वीकृत्य यथोचितं पट्टिकां पूरयतु।**

| | | |
|---|---|---|
| केरलव्यासः। | केरलवाल्मीकिः। | आदिकविः। |
| केरलकालिदासः। | कविकुलगुरुः। | केरलपाणिनिः। |

| कविः | नामान्तरम् |
|---|---|
| ए. आर्. राजराजवर्मा | केरलपाणिनिः |
| कालिदासः | |
| वाल्मीकिः | |
| वल्लत्तोल् नारायणमेनोन् | |
| कोडुङ्ङल्लूर् कुञ्ञिक्कुट्टन् तम्पुरान् | |

**श्रद्धेयौ अंशौ-**

क्रमानुगतत्वम्।

औचित्यम्।



**मञ्जूषातः उचितान् प्रश्नवाचकशब्दान् चित्वा वाक्यानि पूरयतु।**

(कदा, केन, कति, कुत्र, कौ, किम्, कस्य, कस्मात्, कः?)

१. केरलपाणिनिः .........?

२. ए. आर्. राजराजवर्मा ......... प्राथमिकविद्याभ्यासमवाप?

३. ए. आर्. महाशयस्य नामान्तरं ........ ?

४. पाणिनीयम् ........ विरचितम्?

५. केरलपाणिनिः .......... लब्धजन्माभूत्।

६. ए. आर्. महाशयेन.........ग्रन्थाः रचिताः?

७. ए.आर्. राजराजवर्माया: पितरौ .......?

८. केरलवर्मा ........ मातुलः आसीत्?


९. ए. आर्. ......... मृतिमुपगतः?

*श्रद्धेयौ अंशौ-* उचितपदानां योजनम्।

प्रश्नवाचकशब्दानां विविच्य ज्ञानम्।



**पदसूर्यात् सूचनाः स्वीकृत्य स्वमतानि च समायोज्य जीवनचरितं रचयतु।**




*श्रद्धेयाः अंशाः-* क्रमानुगतत्वम्।
वाक्यघटना।
अनुयोज्यता।

## अनुबन्धः

### पदच्छेदः

| | | |
|---|---|---|
| लब्धजन्माभूत् | - | लब्धजन्मा + अभूत्। |
| इत्यादयः | - | इति + आदयः। |
| महाकाव्यञ्च | - | महाकाव्यं + च। |
| मृतिमुपगतः | - | मृतिम् + उपगतः। |

### दकारान्तपुल्लिङ्गः तद् शब्दः

| विभक्तयः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.वि | सः | तौ | ते । |
| द्वि.वि | तम् | तौ | तान्। |
| तृ.वि | तेन | ताभ्याम् | तैः। |
| च.वि | तस्मै | ताभ्याम् | तेभ्यः। |
| प.वि | तस्मात् | ताभ्याम् | तेभ्यः। |
| ष.वि | तस्य | तयोः | तेषाम्। |
| स.वि | तस्मिन् | तयोः | तेषु। |

### भू सत्तायां परस्मैपदि लट्।

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु | भवति | भवतः | भवन्ति। |
| म.पु | भवसि | भवथः | भवथ। |
| उ.पु. | भवामि | भवावः | भवामः। |

**भू सत्तायां परस्मैपदि लिट्।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु | बभूव | बभूवतुः | बभूवुः। |
| म.पु | बभूविथ | बभूवथुः | बभूव। |
| उ.पु | बभूव | बभूविव | बभूविम। |

**भू सत्तायां परस्मैपदि लङ्।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु | अभवत् | अभवताम् | अभवन्। |
| म.पु | अभवः | अभवतम् | अभवत। |
| उ.पु | अभवम् | अभवाव | अभवाम। |

**भू सत्तायां परस्मैपदि लुङ्**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र.पु | अभूत् | अभूताम् | अभूवन्। |
| म.पु | अभूः | अभूतम् | अभूत। |
| उ.पु | अभूवम् | अभूव | अभूम। |

**कृञ् (डुकृञ्) करणे उभयपदि लिट्।**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु | चकार | चक्रतुः | चक्रुः। |
| म.पु | चकर्थ | चक्रथुः | चक्र। |
| उ.पु | चकार/चकर | चकृव | चकृम। |

**वर्षावबोधः**

१०३८ - अष्टत्रिंशदधिकसहस्रम्।

१०९३ - त्रिनवत्यधिकसहस्रम्।

१९४७ - सप्तचत्वारिंशत्यधिकनवशतोत्तरसहस्रम्।

१९५६ - षट्पञ्चाशदधिकनवशतोत्तरसहस्रम्।

२०१५ - पञ्चदशाधिकद्विसहस्रम्।

## किमधिगतम्

निर्देशः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√)क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेश निर्देशः | परिहारबोधनम्* (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १. | लङ् रूपाणि चित्वा लिखितानि। | | | | |
| २. | पट्टिका पूरिता। | | | | |
| ३. | प्रश्नपूरणं कृतम्। | | | | |
| ४. | महात्मागान्धिनः जीवनचरितं लिखितम्। | | | | |

*

१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।

## चतुर्थः पाठः

# श्रीरामोदन्तम्



*आदर्शपुरुषः कः इति वाल्मीकिमहर्षेः प्रश्नस्य उत्तररूपेण श्रीरामः एव इति सूचयति नारदः। तादृशस्य श्रीरामस्य उदन्तं (चरितं) विशदयति श्रीरामोदन्ते काव्ये। अज्ञातनामकः कोऽपि केरलीयः कविः भवति अस्य कर्ता इति विश्वासः।* **अस्मिन् काव्ये रामायणकथां संक्षिप्य वर्णयति। अत्र सप्त काण्डानि सन्ति। तानि तु बाल - अयोध्या - आरण्यक- किष्किन्धा- सुन्दर- युद्ध- उत्तरकाण्डानि। एषु अयोध्याकाण्डाद् दश श्लोकाः अत्र स्वीकृताः।**

शत्रुघ्नेन साकं भरतस्य केकयराज्यगमनानन्तरं दशरथः श्रीरामं राज्ये अभिषेक्तुं निश्चिकाय। कैकेय्या दशरथं प्रति वरद्वयप्रार्थना, तथा अभिषेकविघ्नः, वनयात्रा, चित्रकूटे श्रीरामादीनां निवसनं , च अत्र वर्णितम्।

१. एतस्मिन्नन्तरे गेहं मातुलस्य युधाजितः।
प्रययौ भरतः प्रीतः शत्रुघ्नेन समन्वितः।।

**पदच्छेदः-**

एतस्मिन्नन्तरे - एतस्मिन् + अन्तरे।

| अन्वयः | | अर्थः |
|---|---|---|
| एतस्मिन्नन्तरे | - | तन्मध्ये (स्वयंवरानन्तरं) |
| शत्रुघ्नेन | - | सौमित्रिणा |
| समन्वितः | - | सहितः |
| प्रीतः भरतः | - | सन्तुष्टः भरतः |
| मातुलस्य | - | मातुः भ्रातुः |
| युधाजितः | - | युधाजिन्नामकस्य |
| गेहं | - | गृहं |
| प्रययौ । | - | जगाम। |

**विग्रहः-**

मातुलस्य- मातुः भ्राता मातुलः तस्य, मातुलस्य।

**सारः-**

स्वयंवरानन्तरं भरतः शत्रुघ्नेन साकं मातुलस्य युधाजितः गृहं (केकयराज्यं) प्रययौ।

**पर्यायपदानि-**

गेहम् - गृहम्, भवनम्, मन्दिरम्।

**क्रियापदम्-** प्रययौ- प्र पूर्वक 'या प्रापणे' धातोः परस्मैपदि लिट् प्र.पु.ए.व।

**२. ततः प्रकृतिभिः साकं मन्त्रयित्वा स भूपतिः।**
**अभिषेकाय रामस्य समारेभे मुदान्वितः।।**

**पदच्छेदः-**

मुदान्वितः- मुदा + अन्वितः।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| ततः | - | अनन्तरं |
| सः भूपतिः | - | महाराजः दशरथः |
| प्रकृतिभिः साकं | - | मन्त्रिभिः जनैः च सह |
| मन्त्रयित्वा | - | समालोच्य |

| | | |
|---|---|---|
| मुदान्वितः | - | आनन्दयुक्तः सन् |
| रामस्य अभिषेकाय | - | श्रीरामस्य राज्याभिषेकाय |
| समारेभे। | - | सन्नाहः आरब्धवान्। |

**सारः-** तदनन्तरं राजा दशरथः मन्त्रिभिः प्रजाभिः च समालोच्य आनन्दसहितः सन् रामस्य राज्याभिषेकाय सन्नाहं समारेभे।

**पर्यायपदानि-**

मुदा- प्रीत्या, मोदेन, हर्षेण।

भूपतिः-राजा, महीपतिः, भूपालः।

व्याकरणम्- प्रकृतिभिः साकं- साकं, सार्धं, समं, सह एतेषां पदानां योगे तृतीया भवति।

समारेभे- सम् आङ् रभ् लिट् आत्मनेपदे प्र.पु.ए.व।

३. **कैकेयी तु महीपालं मन्थरादूषिताशया।**
**वरद्वयं पुरा दत्तं ययाचे सत्यसङ्गरम्।।**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| कैकेयी | - | भरतमाता कैकेकी |
| मन्थरादूषिताशया | - | मन्थरायाः (कैकेय्याः दास्याः) मन्त्रणेन दूषितचित्ता भूत्वा |
| सत्यसङ्गरम् | - | सत्यनिष्ठम् |

| | | |
|---|---|---|
| महीपालं | - | राजानं (दशरथं) |
| पुरा | - | पूर्वस्मिन् काले (देवासुरयुद्धकाले) |
| दत्तम् | - | (राज्ञा) प्रदत्तं |
| वरद्वयं | - | द्वौ वरौ |
| ययाचे । | - | याचते स्म। |

**विग्रहः-**

मन्थरया दूषितः आशयः यस्याः सा मन्थरादूषिताशा , तया।

सत्यसङ्गरः- सत्यं सङ्गरः यस्य सः।

**सारः-** मन्थरया दूषितचित्ता कैकेयी सत्यप्रतिज्ञं राजानं पुरा प्रदत्तं वरद्वयं याचितवती।

**क्रियापदं-**

ययाचे- याच् धातोः लिट् आत्मनेपदे प्र.पु. ए,व।

**४. वनवासाय रामस्य राज्याप्त्यै भरतस्य च।**
**तस्या वरद्वयं कृच्छ्रमनुजज्ञे महीपतिः।।**

**पदच्छेदः-**

कृच्छ्रमनुजज्ञे - कृच्छ्रम् + अनुजज्ञे।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| महीपतिः | - | राजा दशरथः |
| रामस्य वनवासाय | - | श्रीरामस्य वननिवासाय |
| भरतस्य राज्याप्त्यै च | - | कैकेयीपुत्रस्य भरतस्य राज्यलाभाय च । |
| तस्याः वरद्वयं | - | कैकेय्याः द्वौ वरौ |
| कृच्छ्रं | - | महता प्रयासेन |
| अनुजज्ञे। | - | सम्मतिम् अयच्छत्। |

**विग्रहः-**

वनवासाय- वने वासः वनवासः, तस्मै।

राज्याप्त्यै- राज्यस्य आप्तिः राज्याप्तिः, तस्यै।

**सारः-** कैकेय्याः प्रार्थनानुसारं राजा दशरथः 'श्रीरामस्य वनवासः, भरतस्य राज्यप्राप्तिः' चेति वरद्वयं महता प्रयासेन तस्यै अदात्।

क्रिया- अनुजज्ञे। अनु पूर्वक ज्ञा धातोः लिट् प्र.पु.ए.व।

५. **रामं तदैव कैकेयी वनवासाय चादिशत्।**
**अनुज्ञाप्य गुरून् सर्वान् निर्ययौ च वनाय सः।।**

**पदच्छेदः-**

| | | |
|---|---|---|
| तदैव | - | तदा + एव। |
| चादिशत् | - | च + आदिशत्। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| तदा एव | - | तस्मिन्नेव समये |
| कैकेयी | - | केकयपुत्री |
| रामं वनवासाय | - | श्रीरामं वने वस्तुं |
| आदिशत् | - | आदिदेश |
| सः | - | रामः |
| सर्वान् गुरून् | - | सर्वान् श्रेष्ठान् |
| अनुज्ञाप्य | - | निवेद्य |
| वनाय निर्ययौ च। | - | काननाय गतवान् च। |

**सारः-**

विना विलम्बं कैकेयी रामं वने वस्तुं (गमनाय) आज्ञां दत्तवती। रामः सर्वान् श्रेष्ठान् नत्वा तेषाम् अनुज्ञया वनमगच्छत्।

६. **दृष्ट्वा तं निर्गतं सीता लक्ष्मणश्चानुजग्मतुः।**
**सन्त्यज्य स्वगृहान् सर्वे पौराश्चानुययुर्द्रुतम्।।**

**पदच्छेदः-**

लक्ष्मणश्चानुजग्मतुः - लक्ष्मणः +च +अनुजग्मतुः।

पौराश्चानुययुः- पौराः +च+ अनययुः।

| **अन्वयः** | | **सारः** |
|---|---|---|
| निर्गतं तं दृष्ट्वा | - | निर्गतं रामं दृष्ट्वा |
| सीता लक्ष्मणः च अनुजग्मतुः | - | जानकी सौमित्रिः च रामम् अन्वगच्छताम् |
| सर्वे पौराः च | - | सर्वे पौरजनाः च |
| स्वगृहान् सन्त्यज्य | - | स्वगृहाणि परित्यज्य |
| द्रुतम् | - | शीघ्रम् |
| अनुययुः | - | अन्वगच्छन्। |

**सारः-**

वनं गच्छन्तं रामं दृष्ट्वा सीता लक्ष्मणः च रामं अन्वगच्छताम्। सर्वाः प्रजाः गृहाणि परित्यज्य तान् (सीतारामलक्ष्मणान्) अन्वगच्छन्।

क्रिया- अनुययुः- अनु या प्रापणे परस्मैपदिः लिट् प्र.पु ब.व।

**व्याकरणम्-** सन्त्यज्य स्वगृहान्- गृहशब्दः विभाषया पुंसि वर्तते। तत्र बहुवचनान्तः एव। गृहाः पुंसि च भूम्न्येव इत्यमरः।

७. वञ्चयित्वा तु तान्पौरान् निद्राणान्निशि राघवः।
वाह्यमानं सुमन्त्रेण रथमारुह्य चागमत्।।

**पदच्छेदः-**

| | | |
|---|---|---|
| निद्राणान्निशि | - निद्राणान् | + निशि। |
| रथमारुह्य | - रथम् | + आरुह्य। |
| चागमत् | - च | + अगमत्। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| राघवः तु | - | रामः तु |
| निशि | - | रात्रौ |
| निद्राणान् | - | निद्रां कुर्वाणान् |
| तान् पौरान् | - | तान् पौरजनान् |
| वञ्चयित्वा | - | प्रतार्य |
| सुमन्त्रेण वाह्यमानं | - | मन्त्रिप्रमुखेन सुमन्त्रेण नीयमानम्। |
| रथम् आरुह्य | - | रथे आरोहणं कृत्वा |
| अगमत् च | - | अगच्छत् च। |

**विग्रहः-**

राघवः- रघोः अपत्यं पुमान् राघवः।

पौरः- पुरे भवाः पौराः तान्।

**सारः-** सीतालक्ष्मणसमन्वितः रामः तु रात्रौ निद्रां कुर्वतः तान् पौरान् वञ्चयित्वा सुमन्त्रेण नीयमानं रथमारुह्य अगच्छत्।

क्रिया- अगमत्- गम्लृ गतौ परस्मैपदि लुङ् प्र.पु ए.व।

८. **शृङ्गिवेरपुरं गत्वा गङ्गाकूलेऽथ राघवः।**
**गुहेन सत्कृतस्तत्र निशामेकामुवास सः।।**

**पदच्छेदः-**

| | | |
|---|---|---|
| गङ्गाकूलेऽथ | - | गङ्गाकूले + अथ। |
| सत्कृतस्तत्र | - | सत्कृतः + तत्र। |
| निशामेकामुवास | - | निशाम् +एकाम् +उवास। |

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| अथ सः राघवः | - | अनन्तरं सः श्रीरामः |
| गङ्गाकूले | - | गङ्गातटे |
| शृङ्गिवेरपुरं गत्वा | - | शृङ्गिवेरपुरं नाम पुरीं गत्वा |
| तत्र गुहेन सत्कृतः (सन्)- | | तत्र शृङ्गिवेरपुरे गुहस्य सत्कारं स्वीकृत्य |
| एकां निशाम् | - | एकां रात्रिम् |
| उवास | - | अवसत्। |

**सारः-**

अनन्तरं श्रीरामः गङ्गायाः तटे श्रृङ्गिवेरपुरं नाम नगरं गत्वा राज्ञः गुहस्य सत्कारं स्वीकृत्य निशीथिनीमेकां तत्रावसत्।

**क्रियापदम्-** निशामेकामुवास- अत्यन्तसंयोगे द्वितीया सम्पूर्णा निशामित्यर्थः । वस् निवासे परस्मैपदि लिट् प्र.पु. ए. व।

९. **सारथिं सन्निमन्त्र्यासौ सीतालक्ष्मणसंयुतः।**
**गुहेनानीतया नावा जाह्नवीं सन्ततार च।।**

**पदच्छेदः-**

सन्निमन्त्र्यासौ - सन्निमन्त्र्य + असौ।
गुहेनानीतया - गुहेन + आनीतया।

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| सीतालक्ष्मणसंयुतः | - | सीतया लक्ष्मणेन च सहितः |
| असौ | - | सः (रामः) |
| सारथिं सन्निमन्त्र्य | - | रथनियन्तारं निमन्त्रणं कृत्वा |
| गुहेनानीतया नावा | - | गुहेन आनीतया तरण्या |
| जाह्नवीं सन्ततार | - | गङ्गानदीं ततार। |

**विग्रहः-**

सीतालक्ष्मणसंयुतः- सीता च लक्ष्मणः च सीतालक्ष्मणौ ताभ्यां संयुतः सीतालक्ष्मणसंयुतः।

**सारः-**

सीतालक्ष्मणसहितः श्रीरामः सुमन्त्रेण सह आलोच्य गुहेन आनीतं नावमारूह्य गङ्गानदीं ततार।

**क्रियापदं-** सन्ततार. सम् तृ प्लवनतरणे परस्मैपदि लिट् प्र. पु ए.व।

**पर्यायं-** नौः- उडुपं, प्लवः, द्रोणिः।

**१०. भरद्वाजमुनिं प्राप्य तं नत्वा तेन सत्कृतः।**
**राघवस्तस्य निर्देशाच्चित्रकूटेऽवसत् सुखम्।।**

**पदच्छेदः-**

| | | |
|---|---|---|
| राघवस्तस्य | - | राघवः + तस्य। |
| निर्देशाच्चित्रकूटे | - | निर्देशात् + चित्रकूटे। |
| चित्रकूटेऽवसत् | - | चित्रकूटे + अवसत्। |

| अन्वयः | | अर्थः |
| --- | --- | --- |
| राघवः भरद्वाजमुनिं प्राप्य | - | श्रीरामः भरद्वाज इति प्रसिद्धं मुनिं समेत्य |
| तेन सत्कृतः (सन्) | - | भरद्वाजमुनिना पूजितः (सन्) |
| तस्य निर्देशात् | - | भरद्वाजस्य निर्देशात् |
| चित्रकूटे | - | चित्रकूटपर्वते |
| सुखम् अवसत् | - | ससुखम् अवसत् |

**सारः-**

महर्षेः भरद्वाजस्य आश्रमं प्राप्तः श्रीरामः मुनेः निर्देशानुसारं चित्रकूटपर्वते सुखम् अवसत्।

## पठनप्रवर्तनानि



**श्लोकान्ताललयानुसारम् आलपतु।**

*श्रद्धेयौ अंशौ-* स्पष्टतया आलपनम्।

आशयावबोधः।



**श्लोकं पठित्वा क्रियापदानि सञ्चित्य लिखतु।**

*श्रद्धेयौ अंशौ-* क्रियापदविवेचनम्।

व्यक्तता निष्ठा च।

**काव्यं पठित्वा अन्वयं लिखतु।**

श्रद्धेयौ अंशौ- आशयावबोधः।

कर्तुः क्रियया सम्बन्धग्रहणम्।

**काव्यं पठित्वा भवताम् इष्टतमः श्लोकः कः? कारणं च किम् इति लिखतु।**

*श्रद्धेयौ अंशौ-* आशयग्रहणम्।

आस्वादनक्षमता।

**काव्यं पठित्वा श्रीरामस्य राज्याभिषेकवृत्तान्ताद् आरभ्य पादुके गृहीत्वा भरतस्य अयोध्याप्रत्यागमनपर्यन्तां कथां स्ववाक्यैः लिखतु।**

*श्रद्धेयाः अंशाः-* आशयावबोधः।

पौर्वापर्यक्रमः।

आकर्षकता।

**श्लोकान् पठित्वा अव्ययपदानि चित्वा लिखतु।**

*श्रद्धेयौ अंशौ-* अव्ययपदविवेचनज्ञानम्।

आशयग्रहणम्।

# किमधिगतम्

निर्देशः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√)क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेश निर्देशः | परिहारबोधनम्* (संख्यया सूचितम्) |
| --- | --- | --- | --- | --- | --- |
| १. | श्लोकाः तालतया-नुसारम् आलपिताः । | | | | |
| २. | काव्यं पठित्वा श्रीरामस्य राज्याभिषेकवृत्तान्ताद् आरभ्य पादुके गृहीत्वा भरतस्य अयोध्याप्रत्यागमन-पर्यान्तकथा लिखिता । | | | | |
| ३. | काव्यं पठित्वा भवताम् इष्टतमः श्लोकः कः ? कारणं किम् इति लिखतम् ? | | | | |
| ४. | श्लोकं पठित्वा क्रिया पदानि सञ्चित्य लिखतानि । | | | | |

* १. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।

धातुपरिचयः

अगमत् - गम्लृ गतौ प.प लुङ्।

| | ए.व | द्वि.व | ब.व |
|---|---|---|---|
| प्र.पु. | अगमत् | अगमताम् | अगमन्। |
| म.पु | अगमः | अगमतम् | अगमत। |
| उ.पु | अगमम् | अगमाव | अगमाम। |

अवसत्- वस् धातु प.प लङ् प्र.पु ए.व

| | | | |
|---|---|---|---|
| प्र.पु | अवसत् | अवसताम् | अवसन्। |
| म.पु | अवसः | अवसतम् | अवसत। |
| उ.पु | अवसम् | अवसाव | अवसाम। |

**शब्दकोशः**

| **पदम्** | **संस्कृतम्** | **कैरली** | **आङ्गलम्** |
|---|---|---|---|
| अवाप | अलभत | നേടി | attained |
| अवसत् | वसति स्म | വസിച്ചു | lived |
| असत्यवादिना | व्याजभाषिणी | കള്ളം പറയുന്നവൾ | lair women |
| अश्रूणि | नेत्राम्बूनि | കണ്ണുനീർതുള്ളികൾ | tear drops |
| आह्वयत | सम्बोधनामकरोत् | വിളിച്ചു | called by the name |

| | | | |
|---|---|---|---|
| उपगतः | प्राप्तः | പ്രാപിച്ചു | reached |
| कलाशाला | कलालयः | കോളേജ് | college |
| कारागृहं | बन्धनगृहं | തടവറ | lockup/jail |
| कूलं | तीरं | തീരം | shore |
| कृच्छ्रं | महता प्रयासेन | വളരെ പ്രയാസത്തോടു കൂടി | with much mental stress |
| कोलम्बाब्दाः | कोल्लवर्षः | കൊല്ലവർഷം | malayalam era |
| कोलाहलः | कलहः | ബഹളം | quarrel |
| गेहं | गृहं | വീട് | house |
| चौर्यं | चोरकार्यं | മോഷണം | theft |
| छुरिका | आयुधविशेषः | കത്തി | knife |
| जाह्नवी | गंङ्गा | ഗംഗ | river ganges |
| तत्समये | तस्मिन् समये | ആ സമയത്ത് | during the time |
| तूष्णीं | निशब्दम् | മൗനമായി | silent |
| दत्तम् | प्रदत्तम् | നൽകപ്പെട്ടത് | being given |
| द्रुतम् | शीघ्रम् | പെട്ടെന്ന് | suddenly |
| नावा | तरण्या | തോണികൊണ്ട് | by the boat |

| | | | |
|---|---|---|---|
| निधाय | निक्षिप्य | വച്ചിട്ട് | having put |
| निशि | रात्रौ | രാത്രിയിൽ | during night |
| पर्यवेक्षकः | निरीक्षकः | നിരീക്ഷകൻ | inspecter |
| प्रासादः | राजमन्दिरम् | രാജകൊട്ടാരം | palace |
| प्रययौ | जगाम | പോയി | went |
| भूपतिः | महाराजः/महीपालः | രാജാവ് | king |
| मनसि | चित्ते | മനസ്സിൽ | in mind |
| मदीयः | मम अयं | എന്റെ | related to me |
| महिला | वनिता/स्त्री | സ്ത്രീ | women |
| मुदा | सानन्दम् | ആനന്ദത്തോടെ | with happiness |
| ययाचे | याचते स्म | യാചിച്ചു | demanded |
| विशारदः | समर्थः/निष्णातः | സമർത്ഥൻ | wellversed |
| व्यरचयत् | रचयामास | രചിച്ചു | composed |
| विख्यातः | प्रसिद्धः | പ്രസിദ്ധർ | famous |
| समस्या | प्रश्नः | പ്രശ്നം | issue |
| सत्यसङ्गरः | सत्यनिष्ठः | സത്യസന്ധൻ | truthful |
| समन्वितः | सहितः | ഒപ്പം | accomplished |

## एककम्- ३

# अमरकोशः

*भाषासंसिद्धिः पदसंपदाश्रिता भवति। समानार्थकानि पर्यायपदान्यवगन्तुं सहायकः ग्रन्थः भवति अमरसिंहाचार्यविरचितः अमरकोशः। पद्यरूपेण विरचितोऽयं ग्रन्थः भाषाजिज्ञासूनां उपकारकः भवेत् इत्यतः पाठभागोऽयं संकलितः वर्तते।*

**पठनाधिगमाः**

१. अमरकोशपंक्तीनां पारायणं करोति।


२. विवेचनं करोति।

३. पदकेलीं चालयति।

४. पर्यायपदानि पूरयति।

५. उचिताक्षरमुपयुज्य पदपूरणं करोति।

६. वर्गीकरणं करोति।



**पर्वतः (शैलवर्गः)**

**महीध्रे शिखरीक्ष्माभृदहार्यधरपर्वताः।**

**अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः।।**

महीध्रः (अ.पु) शिखरी (न.पु) क्ष्माभृत् (त.पु) अहार्यः धरः पर्वतः (सर्वे अ. पु . शब्दाः)। अद्रिः (इ. पु) गोत्रः (अ.पु.) गिरिः (इ. पु.) ग्रावा- न.पु शब्दाः, अचलः , शैलः शिलोच्चयः (अ.पु.शब्दाः)। एतानि त्रयोदश पदानि पर्वतस्य पर्यायवाचकानि।



## मनुष्यः (मनुष्यवर्गः)

**मनुष्या मानुषा मर्त्या मनुजा मानवा नराः।**

**स्युः पुमांसः पञ्चजना पुरुषाः पुरुषाः नरः.।**


मनुष्याः, मानुषाः, मर्त्याः, मनुजाः, मानवाः, नराः, एते अकारान्तपुल्लिङ्ग बहुवचनशब्दाः। पुमांसः- सकारान्तपुल्लिङ्गः बहुवचनशब्दः। पञ्चजनाः, पुरुषाः, पुरुषाः सर्वे अ. बहु। नरः- ऋकारान्तः पुल्लिङ्गः बहुवचनशब्दाः। एते एकादशशब्दोः मनुष्यपर्यायवाचकाः।

## नगरम् (पुरवर्गः)

**पूः स्त्री पुरी नगर्यौ वा पत्तनं पुटभेदनम्।**

**स्थानीयं निगमोऽन्यत्तु यन्मूलनगरात्पुरम्।।**

पूः- रेफान्तः स्त्रीलिङ्गः। पुरी, नगरी शब्दौ ईकारान्तौ स्त्रियाम्। पत्तनम्, पुटभेदनम्. स्थानीयम्- अकारान्तनपुंसकलिङ्गशब्दाः। निगमः- अ.पु। एतानि सप्त नगर्याः पर्यायवाचकानि भवन्ति।



## गृहम् (पुरवर्गः)

**गृहं गेहोदवसित वेश्म सद्म निकेतनम्।**

**निशान्तपस्त्यसदनं भवनागारमन्दिरम्।।**

गृहम् अ.न, गेहः अ.पु उदवसितम् (अ. न), वेश्म, सद्म-एते ( न. न) निकेतनम्, निशान्तं, पस्त्यं, सदनं, भवनम्(अ.न)। आगरः- अ.पु, मन्दिरम् -(अ.न।) एतानि द्वादशनामानि गृहस्य भवन्ति।

## वृक्षः (वनवर्गः)

**वृक्षो महीरुहः शाखी विटपी पादपस्तरुः।**

**अनोकहः कुजस्सालः पलाशी द्रुर्द्रुमागमाः।।**



वृक्षः, महीरुहः-अ.पु, शाखी, विटपी-न.पु, पादपः, अ.पु, तरुः-उ.पु. अनोकहः, कुजः, सालः-अ.पु, पलाशी- न.पु द्रुः- उ.पु द्रुमः, अगमः-अ.पु। त्रयोदश नामान्येतानि वृक्षपर्यायवाचकानि भवन्ति।

## चित्तम् (धीवर्गः)

**चित्तं तु चेतो हृदयं स्वान्तं हृन्मानसं मनः।**

**बुद्धिमनीषा धिषणा धीः प्रज्ञाशेमुषीमतिः।।**

चित्तम्-अ.न, चेतः-स.न, हृदयं स्वान्तं- अ,न, हृत्- द.न, मानसं-अ,न,मनः-स.न एतानि सप्तनामानि मनसः भवन्ति। बुद्धिः- इ स्त्री, मनीषा धिषणा- आ स्त्री, धीः- ई स्त्री, प्रज्ञा-आ स्त्री, शेमुषी-ई स्त्री, मतिः- इ स्त्री। सप्त एतानि नामानि बुद्धेः भवन्ति।

## शब्दः (शब्दादिवर्गः)

**शब्दे निनादनिनदध्वनिध्वानरवस्वनाः।**

**स्वननिर्घोषनिर्ह्लादनादनिस्वाननिस्वनाः।।**

शब्दः, निनादः, निनदः अ.पु ध्वनिः. इ.पु, ध्वानः, रवः, स्वनः, स्वानः, निर्घोषः, निर्ह्लादः, नादः, निःस्वनः, निःस्वानः एते अकारान्ताः पुल्लिङ्गाः। एवं त्रयोदशशब्दाः शब्दपर्यायवाचकाः भवन्ति।

## पठनप्रवर्तनानि



**अमरकोशपङ्क्तीनां पारायणं करोतु।**

*श्रद्धेयाः अंशाः* स्पष्टोच्चारणम्।

उचितस्थाने पदविच्छेदः।

अर्थावगतिः।

तालक्रमः।



**पङ्क्तिषु विद्यमानान् शब्दान् विविच्य लिखतु।**

*श्रद्धेयाः अंशाः-* पदच्छेदनसामर्थ्यम्

अर्थावगतिः।

लिङ्गज्ञानम्।

वचनबोधः।

अन्तप्रबोधः।

पर्यायपदानां ग्रहणम्।

३. **कक्ष्यायां पदकेलिं चालयतु।**

*श्रद्धेयाः अंशाः-* प्रश्नोत्तराणां निर्धारणम्।

केलीचालनम्।

आशयावगमः।

पर्यायशब्दानां विवेचनम्।



**पट्टिकां पठित्वा कोष्टकादक्षराणि स्वीकृत्य पर्यायपदानि निर्धार्य लिखतु।**

| पर्वतः | मनुष्यः | गृहम् | वृक्षः | शब्दः। |
|---|---|---|---|---|
| | | | | |
| | | | | |
| | | | | |

[ लः म हः शि प स वि गि ध न

जाः म् पा गो नि ध्र च पः गा निः

न री नि हा त्यः ड खे न के दः

हा स्व द्म ना अ द नः ही पी र्व

रिः त् पाः द मा तः र्यः त्रः रः ]



**उचिताक्षराण्युपयुज्य पूरयतु ।**

१. प .....तः। २. मही... .।३. ..... लः।

४. मही... हः। ५. पा....पः। ७. .....जः।

८. ....वः। ९. ..... निः। १०. नि......दः।

११. .... यम्। १२. मा..... सः । १३ चे.....।



**अधोदत्तपट्टिकायां विद्यमानशब्दान् वर्गानुसारं स्थापयतु।**

| शैलवर्गः | मनुष्यवर्गः | नगरवर्गः | पुरवर्गः | शब्दवर्गः | वृक्षवर्गः | धीवर्गः |
|---|---|---|---|---|---|---|
| | | | | | | |
| | | | | | | |
| | | | | | | |

| | | | | |
|---|---|---|---|---|
| महीध्रः | चेतः | शिलोच्चयः | ध्वनिः | महीरुहः |
| पत्तनम् | नराः | गेहम् | धिषणा | पादपः |
| निस्वनः | वेश्म | नगरी | धीः | गिरिः |
| पस्त्यम् | ग्रावा | निनादः | प्राज्ञा | ध्वानः |
| पलाशी | निगमः | मतिः | सालः | मानवाः |

*श्रद्धेयौ अंशौ* औचित्यम्।

आशयग्रहणम्।

# किमधिगतम्

निर्देशः- प्रवर्तनानि यथाकालं कृतानि चेत् साधुसूचकचिह्नं (√)क्रियताम्

| क्रम संख्या | प्रवर्तनानि | सम्यक् कृतम् | भागिकतया कृतम् | क्लेश निर्देशः | परिहारबोधनम्* (संख्यया सूचितम्) |
|---|---|---|---|---|---|
| १. | अमरकोशपङ्क्तीनां पारायणं कृतम्। | | | | |
| २. | अमरकोशविवेचनं कृतम्। | | | | |
| ३. | कक्ष्यायां पदकेलिः चालिता। | | | | |
| ४. | पदेषु अक्षरपूरणं कृतम्। | | | | |
| ५. | पर्यायपदानि पूरितानि। | | | | |
| ६. | उचितम् अक्षरं उपयुज्य पदानि पूरितानि। | | | | |
| ७. | शब्दानां वर्गीकरणं कृतम् । | | | | |

*
१. अध्यापकस्य साहाय्येन। २. सुहृदः साहाय्येन। ३. अन्येषां साहाय्येन।